**Total Pages—3** **PG/IS/SANS/101/23**

# M.A. 1st Semester Examination, 2023

## SANSKRIT

PAPER – SAN-101

*Full Marks* : 50

*Time* : 2 hours

*The figures in the right hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

सर्वे प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः

**1.** यथानिर्देशमुत्तरं दीयताम् — 10×2

(क) भवतः पाठ्यांशमनुसृत्य इन्द्रदेवस्य वेदगतचारित्रिकं वैशिष्ट्यं विलिख्यताम् ।

*अथवा*

अथर्ववेदोक्तकालसूक्तस्य माहात्म्यं वैशिष्ट्यञ्च उपवर्ण्यताम् ।

(ख) शतपथनामकरणे किं बीजम् ? कस्मिन् वेदे तदाख्यब्राह्मणस्य अन्तर्भाव: ? तत्र कति महायज्ञा: आलोचिता: ? तेषु ब्रह्मयज्ञस्य स्वरूपं फलञ्च संक्षेपेणालोच्यताम् ।

*अथवा*

सप्रसङ्ग व्याख्या कार्या —

(i) अहरह: स्वाहा कुर्यादा काष्ठात् तथैतं देवयज्ञं समाप्नोति ।

(ii) अहरह: स्वधा कुर्यादोदपात्रात्तथैतं पितृयज्ञं समाप्नोति ।

2. यथानिर्देशमुत्तरं दीयताम् —

(क) अधोलिखितेषु मन्त्रेषु ऋषिच्छन्दोदेवतानिर्देशपूर्वकं मन्त्रद्वयस्य व्याख्या कार्या — 5 × 2

(i) पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ।।

(ii) इन्द्रेषिते प्रसवं भिक्षमाणे
अच्छा समुद्रं रथ्येव याथ: ।
समाराणे ऊर्मिभि: पिन्वमाने
अन्या वामन्यामप्येति शुभ्रे ।।

(*iii*) येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः ।
यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु ॥

(*iv*) सत्यं बृहदृतमुग्रं दीक्षा तपो
ब्रह्म यज्ञः पृथिवीं धारयन्ति ।
सा नो भूतस्य भव्यस्य पत्न्युरुं
लोकं पृथिवी नः कृणोतु ॥

(ख) 'तस्मिन्सूक्ते प्रथमाया ऋचो द्वितीयस्यां पवमानेष्टौ स्विष्टकृतो याज्यात्वेन विनियोगः' — $5 \times 1$
इति भाष्यवचनस्याशयः स्फुटीक्रियताम् ।

(ग) सूत्रोल्लेखपूर्वकं स्वराः साध्यन्ताम्– $2\frac{1}{2} \times 2$

(*i*) अश्नवत् अथवा ईळे ।

(*ii*) कविक्रतुः अथवा दीदिविम् ।

**[ Internal Assessment — 10 Marks ]**